4. किं नाम अनुमानम्? अनुमानस्य भेदद्वयस्य सलक्षणं सोदाहरणं च सर्वम् आलोचयत।

**उत्तरम्-** अनुमितिः एका प्रमा भवति। प्रत्यक्षपूर्वकमेव अनुमितिज्ञानं भवति, तस्मात् प्रत्यक्षम् अनुमितेः कारणं, अनुमितिश्च कार्यमिति मन्यते। अनु अर्थात् पश्चात् मीयते ज्ञायते ज्ञानम् अर्थात् कस्यचित् विषयस्य प्रत्यक्षात् परं तस्य प्रत्यक्षस्य साहाय्येन कस्यचित् अज्ञातविषयस्य यत् ज्ञानमस्माभिः लभ्यते सैव अनुमितिरिति। तस्याः अनुमितेः करणमेव अनुमानमिति। उच्यते च - **'अनुमितिकरणमनुमानम्'** अर्थात् अनुमितिज्ञानस्य यत् असाधारणं कारणं तदेव अनुमानमिति।

अन्नम्भट्टेन अनुमितेः लक्षणमुक्तं- **'परामर्शजन्यं ज्ञानमनुमितिः'** इति। अर्थात् परामर्शात् यत् ज्ञानमुत्पद्यते तदेव अनुमितिरिति। एवं परामर्शजन्यत्वे सति ज्ञानत्वम् अनुमितेलेक्षणम्। अत्र ज्ञानत्वमात्रपदोपादाने सति प्रत्यक्षादौ अतिव्याप्तिः स्यात्, पदमुपात्तम्। किञ्च तावन्मात्रोपादाने सति परामर्शध्वंसे अतिव्याप्तिः स्यात्, तेषामपि ज्ञानत्वात्। तस्मात् लक्षणे परामर्शजन्यमिति परामर्शध्वंसस्य परामर्शजन्यत्वात्। अतः लक्षणे ज्ञानत्वमिति पदमुपात्तमिति बोध्यम्।

ननु तथापि परामर्शजन्ये परामर्शप्रत्यक्षे अतिव्याप्तिः स्यात्। तथाहि **'वह्निव्याप्यधूमवान् पर्वतः'** इति परामर्शस्य यत् वह्निव्याप्यधूमवान् पर्वत इत्याकारकज्ञानवानहमित्याकारकमनुव्यवसायात्मकं द्वितीयं ज्ञानविषयकं प्रत्यक्षं ज्ञानं, तत्र विषयविधया परामर्शस्य कारणत्वादिति चेन्न, हेत्वविषयकत्वाभावात् न तत्रातिव्याप्तिः। तादृशे अनुव्यवसाये धूमस्य विषयतया प्रविष्टत्वादिति भावः। संशयस्थलेऽपि परामर्शजन्यज्ञानमुत्पद्यते, अतः तत्रातिव्याप्तिः स्यात्। तस्मादत्र पक्षतान्वितपरामर्शज्ञानमेव अनुमितिरिति आचार्याभिप्रायः मन्तव्यः।

अनुमानं द्विविधं भवति - स्वार्थानुमानं परार्थानुमानं चेति।

**<u>स्वार्थानुमान</u>**म् - येन कश्चन पुरुषः स्वयमेव महानसादौ पुनः पुनः दर्शनेन **'यत्र यत्र धूमः तत्र तत्र वह्निः'** इति व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते च अग्नौ सन्दिहानः सन् पर्वते धूमं पश्यन् व्याप्तिं स्मरति-यत्र यत्र धूमः, तत्र तत्र वह्निरिति। तदनन्तरं तस्य वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानमुत्पद्यते

। एतदेव ज्ञानं लिङ्गपरामर्शः इत्युच्यते। एतस्मात् यत् ज्ञानं **'पर्वतः वह्निमान्'** इत्याकारकम् ज्ञानमनुमितिरुत्पद्यते, तदेत् स्वार्थानुमानमिति।

**परार्थानुमानम्** -अपरस्य पुरुषस्य प्रयोजनार्थं नाम परस्यानुमेयप्रतिपत्त्यर्थं यत् पञ्चावयवं वाक्यं प्रयुज्यते अनुमाता तदेव परार्थानुमानमिति। कस्यचित् विषयस्य ज्ञानलाभात् परं येन पञ्चावयववाक्यप्रयोगेन अपरस्य ज्ञानं जायते न्यायवैशेषिकनये तस्यैव नाम न्याय इति । एतादृशानि न्यायवाक्यानि एव परार्थानुमानमिति ।

अतः परार्थानुमानं सर्वदैव स्वार्थानुमानं विषयीकरोति । स्वार्थानुमानस्य कृते न्यायवाक्यानां प्रयोगः निष्प्रयोजनीयः चेदपि परार्थानुमानस्य कृते न्यायवाक्यानां प्रयोगः सप्रयोजनीयः । यस्य वाक्यस्य पञ्चावयवाः तिष्ठन्ति, तद् वाक्यं भवति पञ्चावयवाक्यमिति । अखण्डं वाक्यं पञ्चवाक्यानां समष्टिमात्रम् ।

यथा - १. पर्वतो वह्निमान् - इति प्रतिज्ञावाक्यम

२. धूमात् नाम यस्मात् पर्वते धूमः अस्ति-इति हेतुवाक्यम्।

३. यत्र यत्र धूमः तत्र तत्र वह्निः, यथा महानसमिति उदाहरणवाक्यम्,

४. तथाच अयं नाम वह्निव्याप्यधूमवानयं पर्वतः इति उपनयवाक्यम्,

५. तस्मात्तथा नाम पर्वतः वह्निमान् इति निगमनवाक्यम् ।

अतः साध्यविशिष्टपक्षबोधकवचनं भवति प्रतिज्ञा, पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं हेतुः, व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणं, उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः, पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनमिति। एवं पञ्चावयवाक्येन परार्थानुमानं भवति ।

-- By Sanjoy Barman